मूलम् २। घनः ८। अयं खण्डो जातश्चतुर्थो घनः ६४॥ अथवा राशिः ६। अस्य मूलम् ३। घनः २७। अस्य वर्गो नवानां घनः ७२९। य एव वर्गराशिघनः स एव वर्गमूलघनवर्गः॥ इतिघनः॥*॥ अथ घनमूले करणसूत्रं वृत्तद्वयम्।

"आद्यं घनस्थानमथाघने द्वे
पुनस्तथान्त्याद्घनतो विशोध्यम्।
घनं पृथक्स्थं पदमस्य कृत्या
त्रिघ्न्या तदाद्यं विभजेत् फलन्तु॥
पङ्क्त्यां न्यसेत्तत्कृतिमन्त्यनिघ्नीं
त्रिघ्नीं त्यजेत्तत्प्रथमात् फलस्य।
घनं तदाद्याद्घनमूलमेवं
पङ्क्तिर्भवेदेवमतः पुनश्च॥"

अत्रोद्देशकः। पूर्व्वघनानां मूलार्थं न्यासः ७२९। १९६८३। १९५३१२५। क्रमेण लब्धानि मूलानि ९। २७। १२५। इति लीलावत्यां घनमूलम्॥

वर्गोत्तमः, पुं, (वर्गेषु उत्तमः।) चराणां अर्थात् मेषकर्कटतुलामकरराशीनां प्रथमोऽंशः। स्थिराणां अर्थात् वृषसिंहवृश्चिककुम्भराशीनां पञ्चमोऽंशः। द्व्यात्मकानां अर्थात् मिथुनकन्याधनुर्मीनराशीनां नवमोऽंशश्च। यथा,—

"चराणां प्रथमे चांशे स्थिराणां पञ्चमे तथा।
नवमे द्व्यात्मकानाञ्च वर्गोत्तम इति स्मृतः॥"

अपि च। राशीनां स्वकीयनवांशः। यथा,—

"स्वनवांशस्तु राशीनां वर्गोत्तम इति स्मृतः॥"

इति ज्योतिस्तत्त्वम्॥

वर्च्च, द दीप्तौ। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-सेट्।) द, वर्च्चते।। इति दुर्गादासः॥

वर्च्चः, [स्] क्ली, (वर्च्चते इति। वर्च्च+"सर्व्वधातुभ्योऽसुन्।" उणा० ४। १८८। इति असुन्।) रूपम्। विष्ठा। (यथा, सुश्रुते उत्तरतन्त्रे ४० अध्याये।

"शूलाविष्टः सक्तमूत्रोऽन्त्रकूजी
कृच्छ्रापानः सन्नकट्यूरुजङ्घः।
वर्च्चो मुञ्चत्यल्पमल्पं सफेनं
रूक्षं श्यावं सानिलं मारुतेन॥")

तेजः। इति मेदिनी। से, ३५॥ (यथा, ऋग्वेदे। ९। ६६। २१।

"अग्ने पवस्व स्वपा अस्मे वर्च्चः सुवीर्य्यम्॥"

"वर्च्चः तेजः।" इति तद्भाष्ये सायणः॥ अन्नम्। यथा तत्रैव। ३। २४। १।

"अग्ने सहस्व पृतना अभिमातीरपास्य।
दुष्टरस्तरन्नरातीर्वर्च्चोधा यज्ञवाहसे॥"

"वर्च्चोधाः अन्नं धेहि।" इति तद्भाष्ये सायणः॥)

वर्च्चस्कः, पुं क्ली, (वर्च्चस्+स्वार्थे कन्।) विष्ठा। इत्यमरः। २। ६। ६८॥ (दीप्तिः। यथा, महाभारते। १३। २५। १६॥

"देविकायामुपस्पृश्य तथा सुन्दरिकाह्रदे।
अश्विन्यां रूपवर्च्चस्कं प्रेत्य वै लभते नरः॥")

वर्च्चस्वी, [न्] पुं, (वर्च्चोऽस्यास्तीति। वर्च्चस्+"अस्मायामेधास्रजो विनिः।" ५। २। १२१। इति विनिः।) चन्द्रः। यथा,—

"रोहिण्यामभवद्वर्च्चा वर्च्चस्वी येन चन्द्रमाः॥"

इति वह्निपुराणम्॥

वर्च्चाः, [स्] पुं, (वर्च्चते इति। वर्च्च+असुन्।) चन्द्रपुत्त्रः। इति मेदिनी। से, ३६॥ अन्यच्च।

"रोहिण्यामभवद्वर्च्चा वर्च्चस्वी येन चन्द्रमाः।"

इत्याद्ये वह्निपुराणे सर्गानुकीर्त्तने सतीदेहत्यागनामाध्यायः॥

वर्ज्जनं, क्ली, (वृज्+ल्युट्।) त्यागः। हिंसा। इति मेदिनी। ने, १२२॥ मारणम्। इति हेमचन्द्रः॥

वर्ज्जितः, त्रि, त्यक्तः। वृजधातोः क्तप्रत्ययेन निष्पन्नः। यथा,—

"अवज्ञातञ्चावधूतं सरोषं विस्मयान्वितम्।
गुरोरपि न भोक्तव्यमन्नं सत्कारवर्ज्जितम्॥"

इति कौर्म्मे उपविभागे १६ अध्यायः॥

वर्ज्जनीयं, त्रि, (वृज्+अनीयर्।) वर्ज्जनयोग्यम्। त्यक्तव्यम्। वर्ज्जनीयान्नं यथा,—

"राजान्नं नर्त्तकान्नञ्च तक्ष्णोऽन्नञ्चर्म्मकारिणः।
गणान्नं गणिकान्नञ्च षण्ढान्नञ्चैव वर्ज्जयेत्॥
चक्रोपजीविरजकतस्करध्वजिनां तथा।
गान्धर्व्वलोहकारान्नं सूतकान्नं विवर्ज्जयेत्॥
कुलालचित्रकर्म्मान्नं वार्द्धुषेः पतितस्य च।
पौनर्भवच्छात्रिकयोरभिशस्तस्य चैव हि॥
सुवर्णकारशैलूषव्याधितस्यातुरस्य च।
चिकित्सकस्य चैवान्नं पुंश्चल्या दाम्भिकस्य च॥
स्तेननास्तिकयोरन्नं देवतानिन्दकस्य च।
सोमविक्रयिणश्चान्नं श्वपाकस्य विशेषतः॥
भार्य्याजितस्य चैवान्नं यस्य चोपपतिर्गृहे।
उत्सृष्टस्य कदर्य्यस्य तथैवोच्छिष्टभोजिनः॥
अपाङ्क्त्यान्नञ्च सङ्घान्नं शस्त्राजीवस्य चैव हि।
क्लीवस्यान्यासिनश्चान्नं मत्तोन्मत्तस्य चैव हि॥
भीतस्य रुदितस्यान्नमवक्रुष्टं परिक्षुतम्।
ब्रह्मद्विषः पापरुचेः श्राद्धान्नं सूतकस्य च॥
वृथापाकस्य चैवान्नं शावान्नं श्वशुरस्य च।
अप्रजानान्तु नारीणां भृतकस्य तथैव हि॥
कारुकान्नं विशेषेण शस्त्रविक्रयिणस्तथा।
शौण्डान्नं घण्टिकान्नञ्च भिषजामन्नमेव च॥
विद्धप्रजननस्यान्नं परिवित्त्रन्नमेव च।
पुनर्भुवो विशेषेण तथैव दिधिषूपतेः॥
अवज्ञातञ्चावधूतं सरोषं विस्मयान्वितम्।
गुरोरपि न भोक्तव्यं अन्नं सत्कारवर्ज्जितम्॥
दुष्कृतं हि मनुष्यस्य सर्व्वमन्ने व्यवस्थितम्।
यो यस्यान्नं समश्नाति स तस्याश्नाति किल्बिषम्॥"

इति श्रीकूर्म्मपुराणे उपविभागे १६ अध्यायः॥

वर्ज्ज्यः, त्रि, (वृज्+ण्यत्।) वर्ज्जनीयः। यथा,—

"अतः परं प्रवक्ष्यामि त्वं वर्ज्यान्नर्थ्यप्रतिक्रियाम्।
भोज्यमन्नं पर्य्युषितं स्नेहाक्तं चिरसंस्थितम्॥
अस्नेहाश्चापि गोधूमयवगोरसविक्रियाः।
शशकः कच्छपो गोधा श्वाविन्मत्स्योऽथ शल्लकः॥
भक्ष्या ह्येते सदा वर्ज्यौ ग्रामशूकरकुक्कुटौ।
पितृदेवादिशेषञ्च श्राद्धे ब्राह्मणकाम्यया।
प्रोक्षितञ्चौषधार्थञ्च खादन् मांसं न दोषभाक्॥"

इति मार्कण्डेयपुराणे सदाचाराध्यायः॥

वर्ण, क वर्णे। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) क, वर्णयति। अयं कश्चिन्न मन्यते। वर्णः शुक्लादिक्रिया। इति दुर्गादासः॥

वर्ण, त् क स्तुतिविस्तारशुक्लाद्युद्युक्तिदीपने। इति कविकल्पद्रुमः॥ (अदन्त चुरा०-पर०-सक०-दीपने अक०-सेट्।) वर्णयति वर्णापयति कविः स्तौतीत्यर्थः। वर्णयति तन्तुं विस्तारयतीत्यर्थः। वर्णयति प्रतिमां शुक्लादिवर्णां करोतीत्यर्थः। वर्णयति उद्युङ्क्ते दीप्यते वेत्यर्थः। शुक्लाद्युक्तिदीपने इत्यपि पाठः। इति दुर्गादासः॥

वर्णं, क्ली, (वर्णयतीति। वर्ण+अच्।) कुङ्कुमम्। इति हेमचन्द्रः॥

वर्णः, पुं, (व्रियते इति। वृ+"कृवृजृसिद्रुपन्यनिस्वपिभ्यो नित्।" उणा० ३। १०। इति नः। स च नित्।) जातिः। सा च ब्राह्मणः क्षत्त्रियो वैश्यः शूद्रश्च। एषामुत्पत्त्यादिर्यथा। यदा भगवान् पुरुषरूपेण सृष्टिं कृतवान् तदास्य शरीरात् चत्वारो वर्णा उत्पन्नाः। मुखतो ब्राह्मणाः बाहुतः क्षत्त्रियाः ऊरुतो वैश्याः पादतः शूद्रा जाताः। एतेषां वर्णानां धर्म्माः शास्त्रेषु निरूपिताः सन्ति। तत्र ब्राह्मणधर्म्मा उच्यन्ते। अध्ययनं यजनं दानञ्चेति। जीविकात्रयः अध्यापनं याजनं प्रतिग्रहश्चेति। १। क्षत्त्रियस्य त्रयो धर्म्माः। अध्ययनं यजनं दानञ्च। प्रजानां रक्षणं जीविका। २। वैश्यस्य त्रयो धर्म्माः। अध्ययनं यजनं दानञ्च। चतस्रो जीविकाः। कृषिः गोरक्षणं वाणिज्यं कुसीदञ्चेति। ३। शूद्रस्य तु ब्राह्मणसेवाविधा शुश्रूषा धर्म्मो जीविका च। ४। ब्राह्मणा आश्रमचतुष्टयवन्तो भवन्ति। ब्रह्मचारी गृहस्थः वानप्रस्थः सन्न्यासी च। तत्र उपनयनानन्तरं नियमं कृत्वा यो गुरोः सन्निधौ स्थित्वा साङ्गवेदाध्ययनं करोति स ब्रह्मचारीत्युच्यते। १। साङ्गवेदाध्ययनं समाप्य यो दारपरिग्रहं कृत्वा स्वधर्म्माचरणं करोति स गृहस्थ उच्यते। २। पुत्त्रमुत्पाद्य यो वनवासं कृत्वा अकृष्टपच्यफलादि भक्षयित्वा ईश्वराराधनं करोति स वानप्रस्थ उच्यते। ३। यः सर्व्वं गृहादिकं त्यक्त्वा मुण्डितमुण्डो गैरिककौपीनाच्छादनं दण्डं कमण्डलुञ्च बिभ्रत् भिक्षावृत्तिर्निर्ज्जने तीर्थे वा स्थित्वा केवलमीश्वराराधनं करोति स सन्न्यासीत्युच्यते। ४। क्षत्त्रियवैश्ययोस्तु प्रथमाश्रमत्रयं विहितम्। शूद्रस्यैक एव गृहाश्रमः। ईश्वराराधनन्तु सर्व्वेषां वर्णानामाश्रमाणाञ्च साधारणो धर्म्मः। तन्मध्ये यस्तु विष्णूपासकः स वैष्णव उच्यते। शिवोपासकः शैवः। दुर्गादिशक्त्युपासकः शाक्तः। सूर्य्योपासकः सौरः। गणेशोपासको गाणपत्य उच्यते। इति पुराणार्थप्रकाशः॥*॥ अपि च।